श्चेति” २५२ पृ० सुश्रुते उक्तम् । विवरणं विषशब्दे दृश्यम् ।

**अन्त्रमांस** न० “आन्त्रिकं छिद्रमार्गेण धौतं निर्म्मलवारिणा । तस्य खण्डान् संविधाय वेसवार (वेसम) युतान् पचेत् । निःसारं विरसोद्गारमन्त्रमांसमुदाहृतमिति वैद्यकोक्ते पक्वमांसभेदे आन्त्रिके ।

**अन्त्रवृद्धि** पु० अन्त्रनिमित्ता वृद्धिः । सुश्रुतोक्ते रोगभेदे स च रोगः सु० २८९ पृ० सुश्रुते दर्शितो यथा “वातपित्तश्लेष्मशोणितमेदोमूत्रान्त्रनिमित्ताः सप्त वृद्धयः । तासां मूत्रान्त्रनिमित्ते वृद्धी वातसमुत्थे केवलमुत्पत्तिहेतुरन्यतमः ॥ अधःप्रकुपितोऽन्यतमो हि दोषः फलकोशवाहिनीरभिप्रपद्य धमनीः फलकोशयोर्वृद्धिं जनयति तां वृद्धिमित्याचक्षते ॥ तासां भविष्यन्तीनां पूर्व्वरूपाणि वस्तिकटीमुष्कमेढ्रेषु वेदना मारुतनिग्रहः फलकोशशोफश्चेति तत्रानिलपरिपूर्णां वस्तिमिवाततां परुषामनिमित्तानिलरुजं वातवृद्धिमाचक्षते, पक्वोडुम्बरसङ्काशां ज्वरदाहोष्मवतीं चाशुसमुत्थानपाकां पित्तवृद्धिं, कठिनामल्पवेदनां शीतां कण्डूमतीं श्लेष्मवृद्धिं, कृष्णस्फोटावृतां पित्तवृद्धिलिङ्गां, रक्तवृद्धिं मृदुस्निग्धां कण्डूमतीमल्पवेदनां तालफलप्रकाशां मेदोवृद्धिम् ॥ मूत्रसन्धारणशीलस्य मूत्रवृद्धिर्भवति सा गच्छतोऽम्बुपूर्णा दृतिरिव क्षुभ्यति मूत्रकृच्छ्रवेदनां वृषणयोः श्वयथुं कोशयोश्चापादयति तां मूत्रवृद्धिं विद्यात् ॥ भारहरणबलवद्विग्रहवृक्षप्रपतनादिभिरायासविशेषैर्व्वायुरतिप्रवृद्धः प्रकुपितश्च स्थूलान्त्रस्येतरस्य चैकदेशं द्विगुणमादायाधोगत्वा वङ्क्षणसन्धिमुपेत्य ग्रन्थिरूपेण स्थित्वाऽप्रतिक्रियमाणे च कालान्तरेण फलकोशं प्रविश्य मुष्कशोफमापादयत्याध्मातो वस्तिरिवाततः प्रदीर्घः शोफो भवति सशब्दमवपीड़ितश्चोर्द्ध्वमुपैति । विमुक्तश्च पुनराध्मायति तामन्त्रवृद्धिमसाध्यामित्याचक्षते” इति । “षण्मासानुपयुञ्जीतसन्त्रवृद्धिं व्यपोहति” सुश्रुतम् ।

**अन्दिका** स्त्री अदि+बन्धने ण्वुल् । नाट्योक्तौ ज्येष्ठभगिन्यामित्यमरटीकायां नीलकण्ठः ।

**अन्दू** स्त्री अन्द्यते बध्यतेऽनेन अदि+कू । निगड़े स्त्रीपादभूषणभेदे च । स्वार्थे कन् ‘केऽण इति” ह्रस्वः । अन्दुकोऽप्यत्र “स्वार्थिकप्रत्ययस्य प्रकृतितो लिङ्गवचनातिक्रमस्य देवताशब्दादौ दर्शनात् पुंस्त्वम् ।

**अ (आ) न्दोल** दोलने अद० चु० उभ० सक० सेट् । अ(आ)न्दोलयति-ते आन्दुदोलत्-त । ल्युट् । अ(आ)न्दोलनम् “किन्त्वासामरविन्दसुन्दरदृशां द्राक्चामरान्दोलनादि”त्युद्भटः । अ(आ)न्दोलितः । चुरादेराकृतिगणत्वनायमुत्प्रेक्षितः स च दीर्घादिः ।“आन्दोलत् क दोलने” इति कविकल्पद्रुमोक्तेः ह्रस्वान्त इत्यन्ये तन्मूलं मृग्यम् ।

**अन्ध** दृष्टिविघाते अद० चु० उभ० धात्वर्थगृहीतकर्म्मकत्वादकर्मकः सेट् । अन्धयति-ते आन्दिधत्-त । अन्धयन् अन्धितः । “कनकमृगतृष्णान्धितधियेति” सा० द० । दृष्टिरत्र नेत्रेन्द्रियजं प्रत्यक्षं विवेकज्ञानञ्च तद्विघाताश्रयस्य कर्त्तृत्वम् ।

**अन्ध** त्रि० अन्ध–अच् । नेत्रद्वयशून्ये एकचक्षुर्हीने तु नास्य प्रयोगः अनुपहतनेत्रान्तरेण तस्य दर्शनसम्भवात् । अन्धश्च द्विविधः जन्मान्धः, उत्पत्तौ नेत्रद्वयवानपि रोगादिना उपहतनेत्रद्वयश्च उभयत्रैव तत्प्रयोगात् । “जड़मूकान्धबधिरानिति” “उन्मत्तोऽन्धश्च वर्ज्याः स्युरिति” च मनुः । “इहैवास्ते तु सा लोके गौरन्धेवैकवेश्मनीति” “अनंशौ क्लीवपतितौ जात्यन्धबधिरौ” तथेति स्मृत्यन्तरम् “अन्धो गगनं न पश्यतीति” व्यु० गदा० “वृद्धोऽन्धः पतिरेष मञ्चकगत” इति सा० द० । चक्षुःसत्त्वेऽपि आलोकादि सहकारिकारणान्तराभावेन दृष्टिराहित्येऽपि अस्य प्रयोगः । यथा “दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथा परे । केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टय” इति देवी० । तत्र पेचकानां दर्शने आलोकाभावस्यैव सहकारितया तेषां दिवान्धत्वम् । कपोतादीनां तु सूर्य्यालोकाभावेऽपि दीपाद्यालोकान्तरसद्भावे रात्रावन्धता । मनुष्याणान्तु दिवा सूर्य्यालोकात्, रात्रौ दीपाद्यालोकात् उभयत्र दृष्टिमत्त्वान्नान्धत्वम् । विवेकज्ञानशून्ये “क्रोधान्धस्तस्य तस्य स्वयमिह भवितेति” वेणी० ‘नैवान्यत्र मदान्धसिन्दूरघटेति” गङ्गास्तोत्रम् । “स्मरान्धा गाढ़तारुण्या समस्तरतकोविदेति” सा० द० “अज्ञानतिमिरान्धस्येति” गुरुनतिः । परिव्राजकभेदे, तस्य “सचक्षुरचक्षुरिव सकर्णः अकर्ण इवे”त्यादि श्रुत्या वाह्यवस्तुदर्शनशून्यचक्षुःशून्यत्वोक्तेरन्धत्वम् अतएव “तिष्ठतोव्रजतोवापि यस्य चक्षुर्न दूरगम् । चतुष्पदां भुवं मुक्त्वा, परिव्राडन्ध उच्यते” इत्यनेन तस्यान्धत्वं परिभाषितम् । नष्टद्रव्यलाभालाभोपयोगितया ज्योतिषपरिभाषिते राशिभेदे च । ‘मेषो वृषो मृगेन्द्रश्च दिवान्धाः परिकीर्त्तिताः । नृयुक्कर्कटकन्याश्च रात्रावन्धाः प्रकीर्त्तिता” इति तथा च मेषादिषु दिवा नष्टद्रव्यस्य लाभः तत्र ग्रहीतुश्चौरस्य दिवान्धत्वात् । मिथुनादिषु तु रात्रौ नष्टद्रव्यस्य लाभः तत्र ग्रहीतुश्चौरस्य रात्रावन्धत्वात्